International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 346-351
© 2026 IJMH
www.themultijournal.com

Received: 04-04-2026
Accepted: 24-04-2026
Publish : 25-04-2026

Vinayak Bhat
Research Scholar,
Deaprtment of Dharmashastra,
Karnataka Samskrit University,
Chamarajpete, Bangalore

Correspondence:
Dr. Vinayak Bhat
Deputy Director,
MES Prof MPL Sastry Centre for-Vedic Studies, Malleshwaram,
Bangalore 94

स्मृतिग्रन्थेषु 'सम्भूयसमुत्थानम्' इति व्यवहारस्य परिशीलनम्

Vinayak Bhat

DOI: https://doi.org/10.5281/zenodo.23725283

सारसङ्क्षेपः

अस्मिन् शोधप्रबन्धे प्राचीनभारतीयधर्मशास्त्रेषु, विशेषतः महर्षिभिः प्रणीतेषु स्मृतिग्रन्थेषु प्रतिपादितस्य 'सम्भूयसमुत्थानम्' इति पारिभाषिक-व्यवहारपदस्य (वाणिज्यविधेः) सुविस्तृतं, वैज्ञानिकं, वैधानिकञ्च विवेचनं प्रस्तूयते। भारतीयपरम्परायां धर्म-अर्थ-काम-मोक्षा इति पुरुषार्थचतुष्टयस्य महती महिमा वर्णिता अस्ति। तत्र 'अर्थः' इति द्वितीयः पुरुषार्थः मानवजीवनस्य भौतिक-समृद्धेः सामाजिक-सन्तुलनस्य च आधारभूतः वर्तते। प्राचीनभारते आर्थिकव्यवस्थायाः सञ्चालनार्थं वाणिज्यस्य, कृषेः, पशुपालनस्य च महती आवश्यकता आसीत्, येषां समूहरूपं 'वार्ता' इति शब्देन व्यवह्रियते स्म। कालान्तरेण यदा वाणिज्यस्य स्वरूपं विस्तृतं सञ्जातं, तदा एकाकिना वणिजा बृहत्-वाणिज्यस्य सञ्चालनं सङ्कटपूर्णं दुःसाध्यञ्च अभवत्। एतादृश्यां स्थितौ अनेके वणिजः स्वमूलधनं, श्रमं, कौशलञ्च सम्भूय (मिलित्वा) वाणिज्यं कुर्वन्ति स्म। अस्य संयुक्त-वाणिज्यप्रक्रमस्य वैधानिकं नियन्त्रणम्, लाभांशस्य हानि-वहनस्य च व्यवस्थापनं 'सम्भूयसमुत्थानम्' इति नाम्ना स्मृतिग्रन्थेषु अष्टादशव्यवहारपदानाम् अन्तर्गततया अङ्गीकृतम्।

अस्मिन् शोधपत्रीये विमर्शने मनु-याज्ञवल्क्य-नारद-बृहस्पति-प्रभृतिभिः प्रमुखैः स्मृतिकारैः, कौटिल्यादिभिः नीतिशास्त्रकारैश्च अस्य विषयस्य यत् गम्भीरं चिन्तनं कृतम्, तस्य विशदं मीमांसनं क्रियते। अत्र लाभांशस्य आनुपातिक-विभाजनम्, सहभागिनां वैधानिकदायित्वानि, प्रमादात् जातायाः हानेः प्रतिपूर्तिः, तथा च दैविक-राजकीय-विपत्तिषु दायित्वमुक्तिः इत्येतेषाम् अंशानां तत्तत्-स्मृतिश्लोकानां साहाय्येन गवेषणात्मिका समीक्षा अस्ति। आधुनिक-सङ्घटित-वाणिज्यस्य मूलसिद्धान्ताः प्राचीनभारते कियन्तः परिष्कृताः, तार्किकाः, न्यायपूर्णाश्च आसन् इति अत्र सप्रमाणं विविच्यते।

मुख्यशब्दाः

सम्भूयसमुत्थानम्, व्यवहारपदम्, स्मृतिग्रन्थाः, याज्ञवल्क्यस्मृतिः, नारदस्मृतिः, लाभांशविभाजनम्, सहभूयवाणिज्यम्, कौटिलीयमर्थशास्त्रम्, मिताक्षरा, वैधानिकदायित्वम्, दैवराजोपघातः।

अवतरणिका

मानवसमाजस्य क्रमिकविकासेन सहैव आर्थिकक्रियाकलापानां परिधिरपि अतीव विस्तृतः सञ्जातः। प्राचीनभारतीयचिन्तने कृषिः, पशुपालनं, वाणिज्यञ्च 'वार्ता' इति नाम्ना राष्ट्रस्य आर्थिकमूलाधारत्वेन स्वीकृतानि—

कृषिपाशुपाल्ये वाणिज्या च वार्ता।
धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी॥ (कौटिलीयमर्थशास्त्रम् १.४.१)

यदा समाजः अधिकं सङ्घटितः अभवत्, तदा वाणिज्यस्य स्वरूपमपि स्थानीयस्तरात् उत्तीर्य अन्तर्देशीय-पारदेशिक-स्तरेषु प्रवर्धितम्। सार्थवाहाः (समूहेन गच्छन्तः वणिजः) शकटैः सामुद्रिकयानैश्च दूरदेशान् गत्वा धनार्जनं कुर्वन्ति स्म। एतादृशे विशाले महावाणिज्ये विपुलधनस्य, मानवसंसाधनस्य,

सङ्कटवहनक्षमतायाश्च महती आवश्यकता भवति स्म। कश्चन एकः एव वणिक् एतत्सर्वं वोढुं न शक्नोति, यतो हि मार्गे चोराणां, दस्युगणानां, हिंस्रपशूनां, प्राकृतिकविपत्तीनाञ्च महद्भयं भवति स्म। अतः तस्मिन् काले 'सङ्घम्' अथवा 'समवायम्' निर्माय वाणिज्यकरणस्य परिपाटी आरब्धा। अनेके जनाः मिलित्वा यत् कार्यं कुर्वन्ति, तदेव 'सम्भूयसमुत्थानम्' इति पारिभाषिकशब्देन ज्ञायते। वाणिज्यस्य अस्य सङ्घटितस्वरूपस्य सुचारुसञ्चालनार्थं नियमनार्थञ्च सुदृढायाः न्यायव्यवस्थायाः आवश्यकता आसीत्। प्राचीनभारते न्यायस्य धर्मस्य च अभिन्नता आसीत्, यतो हि धर्मशास्त्रमेव विधिशास्त्रम् आसीत्। राज्ञः प्रमुखं कर्तव्यम् आसीत् यत् सः प्रजानां विवादं धर्मशास्त्रानुसारं निष्पक्षतया परिहरेत्—

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥ (याज्ञवल्क्यस्मृतिः २.१)

स्मृतिग्रन्थेषु महर्षिणा मनुना अष्टादश व्यवहारपदानि निर्दिष्टानि, येषु 'सम्भूयसमुत्थानम्' चतुर्थं महत्त्वपूर्णं च पदम् अस्ति—

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च॥ (मनुस्मृतिः ८.४)

यत्र धनस्य लाभस्य च प्रश्नः समागच्छति, तत्र मानवीयाः दुर्बलताः, स्वार्थः, मतभेदाश्च उत्पद्यन्ते एव। तेषां सम्भावितानां विवादानां पूर्वमेव निवारणार्थं स्मृतिकारैः सूक्ष्मातिसूक्ष्माः वैधानिकनियमाः प्रणीताः। अत्र वयं पश्यामः यत् कथं प्राचीनभारतीय-विधिवेत्तृभिः अस्य विषयस्य दार्शनिकं, व्यावहारिकं, न्यायसङ्गतञ्च विश्लेषणं कृतम्।

साहित्यसमीक्षा

प्राचीनभारतीयविधि-प्रणाल्याः मूलस्रोतांसि वेदाः, स्मृतयः, सदाचारश्च सन्ति—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥ (मनुस्मृतिः २.६)

यद्यपि वेदेषु साक्षात् वाणिज्यविधेः नियमाः न प्राप्यन्ते, तथापि तत्र सहकारितायाः सम्भूय-कार्यकरणस्य च बीजरूपं संज्ञानसूक्तादि-मन्त्रेषु स्पष्टं विद्यते—

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते॥ (ऋग्वेदः १०.१९१.२)

कालान्तरेण स्मृतिकारैः समाजस्य आवश्यकतानुसारं सुविस्तृतं विधिविधानं निर्मितम्। अस्मिन् शोधप्रबन्धे अधोलिखितानां ग्रन्थानां समीक्षा आधृता अस्ति—

१. मनुस्मृतिः: भगवान् मनुः प्राचीनभारतस्य आद्यः विधिनिर्माता मन्यते। मनुस्मृतौ अष्टादश-व्यवहारपदानां यत् परिगणनं कृतम्, तदेव परवर्तिभिः स्मृतिकारैः अङ्गीकृतम्। अत्र ऋणादानम्, निक्षेपः, अस्वामिविक्रयः, सम्भूयसमुत्थानम् इत्यादीनि पदानि निर्दिष्टानि। राजकोषस्य, सार्थवाहानां, कृषकाणाञ्च विस्तृताः नियमाः उपलभ्यन्ते—

मनुना यज्ञकर्मणि ऋत्विजां दक्षिणाविभागप्रसङ्गे आनुपातिक-विभाजनस्य यः मौलिकः सिद्धान्तः प्रोक्तः, स एव सर्वत्र सम्भूय-व्यवसायेषु अङ्गीकृतः—

सम्भूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः।
अनेन विधिना कार्यः प्रविभागो यथांशतः॥ (मनुस्मृतिः ८.२११)

२. याज्ञवल्क्यस्मृतिः: महर्षेः याज्ञवल्क्यस्य स्मृतिः मनुस्मृत्यपेक्षया अधिकव्यवस्थिता, तार्किकी, प्रगतिशीला, सङ्क्षिप्ता च वर्तते। अस्यां स्मृतौ आचार-व्यवहार-प्रायश्चित्त-काण्डेषु 'व्यवहाराध्यायः' विशेषरूपेण विधिव्यवस्थां निरूपयति। अत्र सम्भूयसमुत्थानस्य विषये लाभांशस्य, दायित्वस्य, प्रमादस्य च अत्यन्तं स्पष्टाः वैज्ञानिकाश्च नियमाः प्रतिपादिताः सन्ति—

समवायेन वणिजां लाभार्थं कर्म कुर्वताम्।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ॥
(याज्ञवल्क्यस्मृतिः २.२५९)

विज्ञानेश्वरेण रचिता 'मिताक्षरा' अस्याः स्मृतेः सर्वश्रेष्ठा टीका अस्ति, यस्यां वाणिज्यविधेः व्यावहारिकं स्वरूपं व्याख्यातम्।

३. नारदस्मृतिः: नारदस्मृतिः अन्याभ्यः स्मृतिभ्यः सर्वथा भिन्ना अस्ति, यतो हि अयं ग्रन्थः पूर्णतया 'व्यवहार' (विधिक-प्रक्रिया) विषये एव केन्द्रितः अस्ति। नारदः वस्तुतः 'अधिवक्तृणां स्मृतिकारः' इति कथ्यते, यतो हि अत्र केवलं न्यायप्रणाल्याः नियमाः सन्ति। अस्मिन् ग्रन्थे सम्भूयसमुत्थानस्य स्वतन्त्रः अध्यायः एव वर्तते, यत्र अस्य व्यवहारपदस्य स्पष्टा परिभाषा दैवराजोपघातस्य वैज्ञानिकाः सिद्धान्ताश्च उक्ताः सन्ति—

वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते।
तत्सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्॥
(नारदस्मृतिः, सम्भूयसमुत्थानप्रकरणम् ३.१)

४. बृहस्पतिस्मृतिः: बृहस्पतिना मनु-नारदयोः सिद्धान्तान् अङ्गीकृत्य वाणिज्यविधेः विशदीकरणं कृतम्। विशेषतः कीदृशैः जनैः सह सहभूय-वाणिज्यं कर्त्तव्यम्, कीदृशैश्च न कर्त्तव्यम्, तथा च मूलधन-निवेशस्य अनुपातेन लाभांशस्य हानि-वहनस्य च सूक्ष्मनियमाः बृहस्पतिना एव सुस्पष्टं प्रतिपादिताः—

कुलीनदक्षानलसैः प्राज्ञैर्नाणकवेदिभिः।
आयव्ययज्ञैः शुचिभिः शूरैः कुर्यात्सहायताम्॥
अशक्त्यालसरोगार्तमन्दभाग्यनिराश्रयैः।
वाणिज्याद्याः सहैतैस्तु न कर्त्तव्या बुधैः क्वचित्॥
(बृहस्पतिस्मृतिः १३.३– ४)

५. कौटिलीयमर्थशास्त्रम्: यद्यपि अयं न स्मृतिग्रन्थः, तथापि मौर्यकालीनायाः वैधानिक-प्रशासनिक-व्यवस्थायाः अयं परमोत्कृष्टः प्रामाणिकः ग्रन्थः। अर्थशास्त्रे 'धर्मस्थीयम्' 'कण्टकशोधनम्' चेति न्यायालयस्य विभागद्वयं वर्णितम्। अत्र सम्भूयसमुत्थानस्य विषये **सङ्घभृताः सम्भूयसमुत्थातारो वा यथासम्भाषितं वेतनं समं वा विभजेरन्॥** (कौटिलीयमर्थशास्त्रम् ३.१४.१८)

६. निबन्धग्रन्थाः टीकाश्च: कालान्तरेण स्मृतीनां व्याख्यानार्थं टीका-निबन्धग्रन्थाः रचिताः, येषु विज्ञानेश्वरस्य 'मिताक्षरा', देवणभट्टस्य 'स्मृतिचन्द्रिका', चण्डेश्वरस्य 'विवादरत्नाकरः', प्रतापरुद्रदेवस्य 'सरस्वतीविलासः', नीलकण्ठभट्टस्य 'व्यवहारमयूखः' च प्रमुखाः सन्ति। एतेषु ग्रन्थेषु नानास्मृतीनां वाक्यानि सङ्कलय्य सम्भूयसमुत्थानस्य समन्वितं रूपं प्रकाशितम् अस्ति।

ग्रन्थस्य नाम / रचयिता	कालखण्डः (अनुमानितः)	वाणिज्यविधौ / सम्भूयसमुत्थाने मुख्ययोगदानम्
मनुस्मृतिः (मनुः)	२०० ई.पू. – २०० ई.	अष्टादशव्यवहारपदानां सङ्कल्पनम्, यथांश-प्रविभागस्य मूलनियमाः
कौटिलीयमर्थशास्त्रम् (कौटिल्यः)	३०० ई.पू.	धर्मस्थीय-न्यायालये सम्भूयसमुत्था-नस्य सङ्घभृतानां च विस्तृतप्रकरणम्
याज्ञवल्क्यस्मृतिः (याज्ञवल्क्यः)	१०० ई. – ३०० ई.	लाभांश-प्रमाद-हानि-विषयकाः तार्किकाः नियमाः, दायित्वनिर्धारणम्
नारदस्मृतिः (नारदः)	१०० ई. – ४०० ई.	व्यवहारविधेः स्वतन्त्रप्रकरणम्, प्रक्षेप-लक्षणं दैवराजोपघात-सिद्धान्तश्च
बृहस्पतिस्मृतिः (बृहस्पतिः)	३०० ई. – ५०० ई.	सहभागिनां योग्यतापरीक्षणम्, आनु-पातिक-विभाजनस्य स्पष्टनियमनम्
मिताक्षरा (विज्ञानेश्वरः)	११०० ई.	याज्ञवल्क्यस्मृतेः व्यावहारिक-व्याख्यानम्, सूक्ष्मा विधिकमीमांसा
निबन्धग्रन्थाः (विवादरत्नाकरादयः)	१२०० ई. – १७०० ई.	विविधस्मृतिवाक्यानां समन्वयः, वैधानिकनिर्णयानां सङ्ग्रहः

प्रस्तावना

प्राचीनभारतीय-अर्थव्यवस्था कृषिकर्मणि आधारितत्वे अपि, अत्र सुदीर्घा वाणिज्यपरम्परा विद्यते स्म। देशस्य अन्तः (आभ्यन्तरवाणिज्यम्) तथा च देशान्तरैः सह (वैदेशिकवाणिज्यम्) सार्थवाहानां, श्रेणि-सङ्घटनानां च माध्यमेन महान् व्यापारः प्रचलति स्म। यदा अनेके वणिजः स्वधनानि सङ्गृह्य, सामुद्रिकयानैः अथवा शकटैः दूरदेशान् गच्छन्ति स्म, तदा तत्र महती आर्थिकसम्पदा अन्तर्भवति स्म। एतादृशं कार्यं न केवलं लाभप्रदम् आसीत्, अपितु सङ्कटपूर्णमपि आसीत्। नारदमहर्षिणा संयुक्त-वाणिज्यस्य मूलाधारं स्पष्टयता प्रोक्तम्—

फलहेतोरुपायेन कर्म सम्भूय कुर्वताम्।
आधारभूतः प्रक्षेपस्तेनोत्तिष्ठेयुरंशतः॥ (नारदस्मृतिः ३.२)

यदा विविधाः जनाः मिलित्वा वाणिज्यं कुर्वन्ति, तदा तेषां मध्ये मतभेदाः, लाभांशविभाजन-विषयक-विवादाः, हानि-वहन-विषयक-समस्याः च उत्पन्नाः भवन्ति एव। यदि कश्चित् वणिक् अधिकं धनं निवेशयति, अपरश्च न्यूनं धनं निवेशयति, तर्हि लाभांशस्य विभाजनं कथं भवेत्? यदि कश्चित् वणिक् स्वप्रमादेन वाणिज्यस्य सम्पूर्णं पण्यद्रव्यं (भाण्डं) नाशयति, तर्हि तस्य दायित्वं किं भवेत्? यदि च राज्ञा कराधिक्येन अथवा दैविक-प्रकोपेन धननाशः भवति, तदा कः उत्तरदायी? एतेषां सर्वेषां जटिल-प्रश्नानां समाधानं प्राचीनधर्मशास्त्रेषु 'सम्भूयसमुत्थानम्' इति व्यवहारपदे अत्यन्तं प्रामाणिकतया दत्तम् अस्ति। एषा व्यवस्था न केवलं वणिजाम् अधिकाराणां रक्षणं करोति स्म, अपितु तेषां कर्तव्यानाम् अपि कठोरतया अनुपालनं कारयति स्म। अत्र प्रस्तूयते एतेषाम् अंशानां तार्किकं विस्तृतं च विवेचनम्।

मुख्यविवेचनम्

१. सम्भूयसमुत्थानस्य तात्पर्यार्थः वैधानिकं स्वरूपञ्च

संस्कृतवाङ्मये 'सम्भूयसमुत्थानम्' इति शब्दः पदद्वयेन निर्मितः अस्ति— 'सम्भूय' तथा 'समुत्थानम्'। 'सम्' उपसर्गात् 'भू' धातोः क्त्वा-प्रत्यये कृते ल्यबादेशे च 'सम्भूय' इति पदं निष्पद्यते, यस्य अर्थः अस्ति 'मिलित्वा', 'सङ्घीभूय', 'सहभूय' वा। तथैव 'सम्' तथा 'उद्' उपसर्गाभ्यां 'स्था' धातोः ल्युट्-प्रत्यये कृते 'समुत्थानम्' इति पदं निष्पद्यते, यस्य अर्थः अस्ति 'उद्यमः', 'कार्यप्रारम्भः', 'उद्योगः' वा। वाचस्पत्य-शब्दकोशानुसारं तथा च शब्दकल्पद्रुमानुसारम्—

सम्भूय मिलित्वा समुत्थानं कार्यकरणं वाणिज्यादिकं यत्र तत् सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्॥ (शब्दकल्पद्रुमः, भा. ५)

अस्य तात्पर्यम् अस्ति यत् यत्र द्वौ वा अधिकौ जनौ स्वकीयं धनं, कौशलं, श्रमं वा संयोज्य वाणिज्यस्य कस्यापि उद्योगस्य वा आरम्भं कुरुतः, तत् कार्यं 'सम्भूयसमुत्थानम्' इति कथ्यते।

अत्रेदं ध्यातव्यं यत् एषा व्यवस्था न केवलं धनिकानां वणिजां सङ्घटनार्थम् अभिप्रेता आसीत्, अपितु शिल्पिनां, नटानां, गायकानां, कृषकाणां, भृतिभुजाम् (वेतनभोगिनां), ऋत्विजाश्च (ये मिलित्वा विशालं यज्ञं सम्पादयन्ति) सङ्घटनमपि अस्मिन् अन्तर्भवति। महर्षिणा याज्ञवल्क्येन स्पष्टीकृतम्—

अनेन विधिनाख्याता ऋत्विक्कर्षककर्मिणाम्।
तथा वणिक्प्रभृतीनां कर्म सम्भूय कुर्वताम्॥ (याज्ञवल्क्यस्मृतिः २.२६५)

स्मृतिचन्द्रिकायां, विवादरत्नाकरे च एतेषां सर्वेषां सङ्घटितकार्याणां विवेचनं 'सम्भूयसमुत्थान' प्रस्तावे एव कृतम् अस्ति। एतेन ज्ञायते यत् प्राचीनभारते सहकारितायाः (सहभूय-कार्यकरणस्य) वैधानिकं क्षेत्रम् अतीव विस्तृतम् आसीत्।

२. मूलधन-निवेशः, लाभांशविभाजनं हानि-वहनञ्च (आनुपातिक-विभाजन-सिद्धान्तः)

यदा अनेके जनाः मिलित्वा वाणिज्यं कुर्वन्ति, तदा सर्वेषां धननिवेशः (मूलधनं वा प्रक्षेपः) समानः न भवति। कश्चित् स्वल्पधनः भवति कश्चित् आढ्यः। अतः लाभांशस्य हानेश्च विभाजनार्थं स्मृतिकारैः अतीव न्यायपूर्णः आनुपातिक-सिद्धान्तः प्रतिपादितः।

महर्षिः बृहस्पतिः तथा च नारदः अत्र स्पष्टं वैधानिकं नियमं वदतः—

समोऽतिरिक्तो हीनो वा यत्रांशो यस्य यादृशः।
क्षयव्ययौ तथा वृद्धिस्तस्य तत्र तथाविधा॥
(नारदस्मृतिः ३.३; बृहस्पतिस्मृतिः १३.५)

अस्य श्लोकस्य वैधानिकं विश्लेषणम्: संयुक्त-वाणिज्ये यत्र यस्य वणिजः अंशः (मूलधन-निवेशः) यादृशः भवति—सः 'समः' (समानः) भवेत्, 'अतिरिक्तः' (अधिकः) भवेत्, अथवा 'हीनः' (न्यूनः) भवेत्—तस्य वणिजः वाणिज्ये 'क्षयः' (हानिः), 'व्ययः' (सञ्चालन-व्ययः), तथा च 'वृद्धिः' (लाभांशः) तस्मिन् एव अनुपाते भवति। याज्ञवल्क्यस्मृतौ अपि प्रोक्तम्—**"लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ"** (२.२५९)।

अयं सिद्धान्तः अत्यन्तं तार्किकः अस्ति। यदि कश्चित् वणिक् वाणिज्ये चत्वारिंशत्-प्रतिशतं (४०%) धनं निवेशयति, तर्हि सः लाभस्य चत्वारिंशत्-प्रतिशतम् एव प्राप्नोति; किन्तु यदि वाणिज्ये हानिः भवति, तर्हि सः हानेः अपि चत्वारिंशत्-प्रतिशतम् एव वक्ष्यति। अत्र कोऽपि अन्यायः नास्ति। मदनरत्नप्रदीपे तथा अन्यनिबन्धेषु अस्य श्लोकस्य व्याख्यायां स्पष्टीकृतं यत् यदि पूर्वम् एव कश्चन विशिष्टः अनुबन्धः (संवित् अथवा प्रतिज्ञा) न कृतः अस्ति, तर्हि एषः एव सामान्यनियमः सर्वत्र प्रयोक्तव्यः। अनेन सिद्धान्तेन सहभागिनां मध्ये विवादानां सम्भावना न्यूना भवति, यतो हि सर्वं गणितीय-पद्धत्या निर्धारितं भवति।

३. सहभागिनां वैधानिककर्तव्यानि तथा प्रमाद-निषिद्ध-व्यापारेषु दायित्वनिर्धारणम्

सम्भूयसमुत्थाने सर्वेषां सहभागिनां परस्परं विश्वासः (आस्था) परमः आवश्यकः भवति। यदा एकः वणिक् सङ्घस्य प्रतिनिधिरूपेण कार्यं करोति, तदा तस्य स्वार्थरहितं कार्यकरणम् अपेक्षितम् अस्ति। यदि कश्चित् वणिक् अन्येषां वणिजां सम्मतिं विना किमपि दुस्साहसं करोति, अथवा अनवधानतायाः (प्रमादात्) वाणिज्यस्य पण्यद्रव्यस्य नाशं करोति, तर्हि तस्य दायित्वं कथं निश्चेतव्यम्?

अस्मिन् विषये याज्ञवल्क्यस्मृतेः व्यवहारकाण्डे नारदस्मृतौ च अतीव महत्त्वपूर्णौ श्लोकौ उपलभ्येते—

प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम्।
स तद्द्याद्विप्लवाच्च रक्षिता दशमांशभाक्॥

(याज्ञवल्क्यस्मृतिः २.२६०)

प्रमादान्नाशितं दाप्यः प्रतिषिद्धकृतं च यत्।
असन्दिष्टश्च यत्कुर्यात्सर्वैः सम्भूय वाणिजैः॥ (नारदस्मृतिः ३.५)

अस्य श्लोकस्य मिताक्षरा-टीकायां विज्ञानेश्वरेण अत्यन्तं सूक्ष्मं विधिकं विश्लेषणं कृतम् अस्ति। अत्र दायित्वस्य त्रयः मुख्याः आधाराः दर्शिताः सन्ति—

१. **प्रतिषिद्धम्:** यत् कार्यम् अन्यैः वणिग्भिः सङ्घेन वा साक्षात् निषिद्धम् आसीत्। यथा—"अस्मिन् मार्गे चोराः सन्ति, एतेन मार्गेण न गन्तव्यम्" इति उक्ते सत्यपि, यदि कश्चित् वणिक् तेनैव मार्गेण गच्छति, पण्यद्रव्यस्य नाशञ्च करोति, तर्हि सः तस्य हानेः पूर्णं मूल्यं स्वेन धनेन दद्यात्। अत्र सङ्घस्य हानिः न मन्तव्या, अपितु तस्य व्यक्तिगतं दायित्वं भवति।

२. **अनादिष्टम् (असन्दिष्टम्):** यत् कार्यं कर्तुं सङ्घेन कोऽपि आदेशः न दत्तः आसीत्, परन्तु सः स्वबुद्ध्या एव साहसं करोति, तस्मात् यदि हानिः भवति, तर्हि सोऽपि तस्य कृते एव उत्तरदायी भवति।

३. **प्रमादात्:** यदि सः वणिक् पण्यद्रव्यस्य सुरक्षार्थं नियुक्तः आसीत्, किन्तु मद्यपानादिना, निद्रया, द्यूतक्रीडया, अथवा अन्यासावधानतया द्रव्यस्य रक्षणं न करोति, तदा तस्य नाशे तस्यैव व्यक्तिगतं दायित्वं भवति। अपि च, यदि कश्चित् सहभागी वञ्चकः (जिह्मः) भवति, तर्हि अन्ये सहभागिनः तं लाभरहितं कृत्वा सङ्घात् निष्कासयेयुः—

जिह्मं त्यजेयुर्निलाभमशक्तोऽन्येन कारयेत्॥

(याज्ञवल्क्यस्मृतिः २.२६५)

परन्तु श्लोकस्य उत्तरार्धे याज्ञवल्क्यः नारदश्च वदतः यत्—**"विप्लवाच्च रक्षिता दशमांशभाक्"**। अर्थात्, यदि कश्चित् वणिक् चोराणाम् आक्रमणे सति, अथवा अग्नेः प्रकोपे सति, जलप्लावनादि-विप्लवे सति, स्वप्राणान् सङ्कटे क्षिप्त्वा सङ्घस्य द्रव्यस्य रक्षां करोति, तर्हि तस्मै वीर-वणिजे तस्य रक्षितद्रव्यस्य दशमः अंशः (१/१० भागः) अतिरिक्त-पुरस्काररूपेण दातव्यः। एतादृशी व्यवस्था वणिजां मध्ये उत्साहवर्धनार्थं, शौर्यप्रदर्शनार्थं, वाणिज्यसंरक्षणार्थञ्च कल्पिता आसीत्। एतद् दर्शयति यत् प्राचीन-वाणिज्यविधिः न केवलं दण्डं विदधाति, अपितु सत्कर्मणः पुरस्कारमपि यच्छति।

४. दैविक-राजकीय-विपत्तीनां प्रभावः (दैवराजोपघात-सिद्धान्तः)

प्राचीनकाले वाणिज्यमार्गाः अत्यन्तं सङ्कटपूर्णाः आसन्। कदाचित् सामुद्रिकयानेन गच्छन्ती नौका झञ्झावातेन जलमग्ना भवति स्म। कदाचित् वने सार्थवाहं चोराः लुण्ठयन्ति स्म। कदाचित् च राजा अकारणमेव सर्वेषां द्रव्यस्य हरणं करोति स्म। एतादृशाः परिस्थितयः मानवीय-नियन्त्रणात् सर्वथा बहिः आसन्। यत्र मानवानां नियन्त्रणं नास्ति, तत्र हानेः दायित्वं कस्योपरि आगच्छेत्?

अस्मिन् विषये महर्षिणा नारदेन याज्ञवल्क्येन च स्वस्मृत्योः स्पष्टरूपेण दैवराजोपघात-सिद्धान्तस्य प्रतिपादनं कृतम् अस्ति, यः सिद्धान्तः आधुनिक-न्यायशास्त्रे अपि अत्यन्तं विख्यातः अस्ति—

दैवराजोपघाते तु न दोषो धनिनः क्वचित्। (नारदस्मृतिः; सरस्वतीविलासे उद्धृतम्)

दैवतस्करराजाग्निर्व्यसने समुपस्थिते।
यस्तत्स्वशक्त्या रक्षेत तस्यांशो दशमः स्मृतः॥

(नारदस्मृतिः ३.६)

अस्य दार्शनिकं वैधानिकञ्च विश्लेषणम्: नारदवचनानुसारं (यथा सरस्वतीविलासे, व्यवहारमयूखे, अन्यनिबन्धेषु च सप्रमाणम् उद्धृतम् अस्ति), यदि वाणिज्यस्य भाण्डं 'दैवोपघातेन' अर्थात् दैविक-विपत्तिना (यथा भूकम्पः, अतिवृष्टिः, अनावृष्टिः, विद्युत्पातः, अग्निकाण्डः) अथवा 'राजोपघातेन' अर्थात् राजकीय-विपत्तिना (यथा राज्ञः क्रोधेन, कराधिक्येन, राज्यस्य युद्धेन, मार्गावरोधेन वा) नष्टं

भवति, तर्हि तत्र कार्यवाहकस्य सहभागिनः कश्चित् अपि दोषः न मन्तव्यः।

अर्थात् तस्मिन् सङ्कटे या हानिः सञ्जाता, सा सम्पूर्णस्य सङ्घस्य हानिः मन्तव्या, न तु कस्यापि एकस्य। अयं सिद्धान्तः व्यवहारविधेः परमां न्यायनिष्ठां द्योतयति। यत्र मानवीयः प्रमादः नास्ति, तत्र व्यक्तिगतः दण्डः अपि न भवेत् इति अस्य सारः। दैवराजोपघाते सति सर्वे वणिजः स्व-स्व-प्रक्षेपानुरूपम् एव हानिं सहन्ते।

दायित्वस्य प्रकारः	परिस्थितयः (स्मृतिग्रन्थानुसारम्)	वैधानिक-परिणामः
प्रमादः / निषिद्धकर्म	सम्मर्तिं विना निषिद्ध-मार्गेण गमनम्, रक्षणे निद्रा, द्यूतक्रीडा च	सम्पूर्णहान्याःक्षतिपूर्तिःतेनैव वणिजा कार्या (व्यक्तिगत-दायित्वम्)।
दैवोपघातः	जलप्लावनम्, वह्निः, झञ्झावातः,प्राकृतिक-आपत्तिः	कस्यापि व्यक्तिगतः दोषः नास्ति; सर्वे स्वानुपातेन हानिं वक्ष्यन्ति (दोषमुक्तिः)।
राजोपघातः	राज्ञा सम्पदः हरणम्, राजनैतिक-अवरोधः, युद्धम्	पूर्णतया व्यक्तिगत दोष-मुक्तिः; सर्वेषां सहभागिनाम् आनुपातिक-हानिः।
विप्लवात् रक्षणम्	चोर-दस्यु-अग्नि-जल-इत्यादिभ्यः स्वप्राणान् सङ्कटे क्षिप्त्वा रक्षणम्	रक्षित-पण्यद्रव्यस्य दशमांशः (१०%) रक्षकाय अतिरिक्त-पुरस्काररूपेण प्राप्यते।

५. वाणिज्यविवादानां निराकरणं न्यायव्यवस्था च

सम्भूयसमुत्थानस्य प्रक्रमे यदा वणिजां मध्ये मतभेदः वा विवादः उत्पद्यते स्म, तदा तस्य निर्णयः कथं भवति स्म? प्राचीनभारते न्यायालयस्य एकं पदानुक्रमिकं, सुव्यवस्थितं स्वरूपम् आसीत्। कौटिल्यस्य अर्थशास्त्रे, याज्ञवल्क्यस्मृतौ, नारदस्मृतौ च स्पष्टं वर्णितं यत् सर्वेषां विवादानां कृते साक्षात् राज्ञः न्यायालयं गन्तुम् आवश्यकता नासीत्। महर्षिणा याज्ञवल्क्येन नारदेन च न्यायाधिकरणानां पदानुक्रमः इत्थं निर्दिष्टः—

नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च।
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम्॥ (याज्ञवल्क्यस्मृतिः २.३०)

कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः।
प्रतिष्ठा व्यवहाराणां गुर्वेषां तूत्तरोत्तरम्॥

(नारदस्मृतिः, मातृका १.७)

विशेषतः वाणिज्यविवादानां निर्णयार्थं त्रीणि विशिष्टानि स्थानीय-अधिकरणानि आसन्—

१.**कुलम्:** कुलानां (समान-परिवाराणां जातिसमूहानां वा) न्यायसभा।

२.**श्रेणिः:** समान-व्यापारं शिल्पं वा कुर्वतां जनानां सङ्घटनम् (यथा—सुवर्णकाराणां श्रेणिः, तन्तुवायानां श्रेणिः, सार्थवाहानां श्रेणिः)।

३.**पूगः (गणः):** विभिन्न-जातीनां, विभिन्न-व्यापाराणां च सङ्घटनम्, यत् नगरस्तरे ग्रामस्तरे वा कार्यं करोति स्म।

याज्ञवल्क्य-बृहस्पति-नारदानां मतानुसारम्, वाणिज्यविवादेषु प्रथमतः 'कुलेन' अथवा 'श्रेण्या' एव निर्णयः क्रियते स्म, यतो हि श्रेण्याः सदस्याः (अन्ये वणिजः) वाणिज्याचाराणां (व्यापारिक-नियमानां) सूक्ष्मज्ञाताः भवन्ति स्म। बृहस्पतिस्मृतौ अपि प्रोक्तं यत् वणिजां विवादे वणिजः एव परीक्षकाः स्युः। यदि कोऽपि श्रेण्याः निर्णयेन असन्तुष्टः भवति स्म, तर्हि सः 'पूगम्' प्रति पुनर्विचारणाय प्रार्थनाम् (पुनरभियोगं) कर्तुं शक्नोति स्म। ततः अपि असन्तुष्टः साक्षात् राज्ञः न्यायालयं (प्राड्विवाकस्य अधिकरणं) गच्छति स्म।

मिताक्षरायां विज्ञानेश्वरः नारदस्य प्रमाणं दत्त्वा कथयति यत् राज्ञः न्यायालयः सर्वोच्चः न्यायालयः आसीत्। राजा अपि स्वेच्छया निर्णयं न करोति स्म, अपितु श्रुति-स्मृति-सदाचाराणां साहाय्येन विद्वद्भिः ब्राह्मणैः, मन्त्रिभिः, अनुभवि-न्यायाधीशैश्च (सभ्यैः) सह उपविश्य धर्मानुसारं न्यायम् आचरति स्म—

श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥

(याज्ञवल्क्यस्मृतिः २.२)

कौटिल्यः तु स्वकीयेऽर्थशास्त्रे धर्मस्थीय-अधिकरणे भ्रष्ट-न्यायाधीशानां (धर्मस्थानां) कृते कठोरदण्डस्य अपि विधानं करोति, येन न्यायप्रणाल्यां पूर्णतया पारदर्शिता भवेत्। एषा व्यवस्था अद्यतनीयायाः वाणिज्यिक-न्यायाधिकरण-व्यवस्थायाः माध्यस्थ-प्रणाल्याश्च प्रतिरूपम् एव आसीत्।

६. वणिजः मरणोत्तरं सम्भूयसमुत्थानस्य स्थितिः

यदा दीर्घकालं यावत् वाणिज्यसङ्घः कार्यं करोति, तदा मध्ये यदि कस्यचित् वणिजः देशान्तरे अकस्मात् मृत्युः भवति, तर्हि तस्य अंशस्य किं भवति? अस्मिन् विषये याज्ञवल्क्येन, नारदेन, बृहस्पतिना, कौटिल्येन च स्पष्टं प्रतिपादितं यत् मृतस्य वणिजः अंशः तस्य उत्तराधिकारिभ्यः दातव्यः—

देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः।
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः॥

(याज्ञवल्क्यस्मृतिः २.२६४)

एकस्य चेत्स्याद्व्यसनं दायादोऽस्य तदाप्नुयात्।
अन्यो वा गोत्रजः कुर्यादशक्तौ सर्व एव वा॥ (नारदस्मृतिः ३.७)

अर्थात् देशान्तरे मृतस्य वणिजः धनं तस्य दायादाः (पुत्रादयः), बान्धवाः (मातुलादयः), अथवा ज्ञातयः (सगोत्राः) आगत्य गृह्णीयुः। यदि तस्य कोऽपि साक्षात् उत्तराधिकारी नास्ति, तर्हि सः अंशः अन्यैः सहभागिभिः सुरक्षितः रक्षणीयः (दशवर्षं यावत् प्रतीक्ष्यः इति नारदमतम्), तदभावे च राजकोषे समर्पणीयः; किन्तु अन्यैः वणिग्भिः तस्य धनस्य अपहरणं कदापि न करणीयम्। एषा व्यवस्था दर्शयति यत् वाणिज्यसङ्घस्य आयुः कस्यचित् एकस्य वणिजः मरणेन न समाप्यते स्म, अपितु सङ्घः उत्तराधिकारिभिः सह

निरन्तरं प्रचलति स्म, यः आधुनिक-नैगमिक-अविच्छिन्नतायाः (शाश्वत-उत्तराधिकारस्य) मूलसिद्धान्तः वर्तते।

उपसंहारः

समग्रस्य विवेचनस्य अयं निष्कर्षः अस्ति यत् प्राचीनभारते वाणिज्यार्थं या वैधानिक-व्यवस्था आसीत्, सा अत्यन्तं प्रौढा, वैज्ञानिकी, न्यायनिष्ठा, सूक्ष्मा च आसीत्। 'सम्भूयसमुत्थानम्' इति व्यवहारपदं न केवलं धनिकानां वणिजां हितानि रक्षति स्म, अपितु श्रमिकाणां, शिल्पिनां, कृषकाणां, सामान्य-सहभागिनाञ्च अधिकाराणां रक्षणं करोति स्म।

मनु-याज्ञवल्क्य-नारद-बृहस्पति-प्रभृतिभिः महानुभावैः स्मृतिकारैः, तथा च कौटिल्येन लाभांशस्य आनुपातिक-विभाजनाय (**"समोऽतिरिक्तो हीनो वा..."**), दायित्वनिर्धारणाय (**"प्रतिषिद्ध-मनादिष्टं प्रमादाद्यच्च नाशितम्..."**), विपत्तौ दोषमुक्त्यै च (**"दैवराजोपघाते तु न दोषो धनिनः क्वचित्"**) ये वैधानिकाः सिद्धान्ताः प्रवर्तिताः, ते आधुनिक-सङ्घटित-वाणिज्यविधेः (सहभागिता-विधेः) पूर्णतया समानान्तराः, कदाचित् ततोऽपि श्रेष्ठाः प्रतीयन्ते। वाणिज्याधिकरणानां (कुल-श्रेणि-पूगादीनां) स्थापना तु विकल्पात्मक-विवाद-निवारण-प्रणाल्याः प्राचीनं निदर्शनम् अस्ति।

अतः, स्मृतिग्रन्थेषु प्रतिपादितं सम्भूयसमुत्थान-विषयकं चिन्तनं प्राचीनानां भारतीयानां गम्भीर-आर्थिक-विधिक-प्रज्ञायाः साक्षात् प्रमाणम् अस्ति। अद्यत्वे अपि विधिशास्त्रस्य अध्ययने शोधार्थिभ्यः एतानि वचनानि नूतनां दृष्टिं प्रदातुं समर्थानि सन्ति। अस्य गहन-अध्ययनेन ज्ञायते यत् प्राचीनभारते वाणिज्यं न केवलं लाभार्जनस्य साधनम् आसीत्, अपितु तत्र धर्मस्य, न्यायस्य, नैतिकतायाश्च कठोरम् अनुपालनं भवति स्म।

ग्रन्थसूची

1. **काणे, पाण्डुरङ्ग वामनः।** (१९७३)। *धर्मशास्त्रका इतिहास (History of Dharmaś ā stra)* (भाग ३, २य सं.)। भाण्डारकर ओरिएण्टल रिसर्च इन्स्टीट्यूट, पुणे।
2. **कात्यायनः।** (१९३३)। *कात्यायनस्मृतिसारोद्धारः* (ऋणादान-प्रकरणम् श्लो. ५४२–५६५ एवं स्त्रीधनप्रकरणम् श्लो. ८९४–९१६; पां. वा. काणे, संपा.)। ओरिएण्टल बुक एजेन्सी, पुणे।
3. **जीमूतवाहनः।** (१९७८)। *दायभागः: स्त्रीधनाधिकारः* (चतुर्थोऽ-ध्यायः; हेरम्ब चट्टोपाध्याय शास्त्री, संपा.)। एशियाटिक सोसाइटी, कोलकाता।
4. **जोइस, एम. राम।** (२००४)। *लीगल एण्ड कॉन्स्टिट्यूशनल हिस्ट्री ऑफ इण्डिया (Legal and Constitutional History of India)* (भाग १)। यूनिवर्सल लॉ पब्लिशिंग कम्पनी, नई दिल्ली।
5. **नारदः।** (१९८९)। *नारदस्मृतिः: व्यवहारमातृका तथा ऋणादानप्रकरणम्* (१.१–१००; जूलियस जॉली, संपा.)। एशियाटिक सोसाइटी, कोलकाता।
6. **बृहस्पतिः।** (१९४१)। *बृहस्पतिस्मृतिः: व्यवहारकाण्डः, ऋणादानप्रकरणम्* (अव्यावहारिकम् ऋणम्, १०.११७–१२०; के. वी. रङ्गस्वामी अयङ्गार, संपा.)। ओरिएण्टल इन्स्टीट्यूट, वडोदरा।
7. **मनुः।** (२००५)। *मनुस्मृतिः: व्यवहारपदानि दण्डव्यवस्था च* (७.१४–३१, ८.१–१७८; कुल्लूकभट्टकृत-मन्वर्थमुक्तावली-सहिता; हरगोविन्दशास्त्री, संपा.)। चौखम्बा संस्कृत संस्थान, वाराणसी।
8. **याज्ञवल्क्यः।** (१९४९)। *याज्ञवल्क्यस्मृतिः: मिताक्षराटीकासहिता* (व्यवहाराध्यायः, ऋणादानप्रकरणम्, कुसीदवृद्धिनियमाः २.३७–६४; नारायणराम आचार्य, संपा., ५म सं.)। निर्णयसागर मुद्रणालयः, मुम्बई।
9. **वसिष्ठः।** (१९३०)। *श्रीवासिष्ठधर्मशास्त्रम् (वसिष्ठधर्मसूत्रम्)* (आचारधर्मः कुसीदनिन्दा च, २.४०–५०; ए. ए. फ्यूहरर, संपा., ३य सं.)। भाण्डारकर ओरिएण्टल रिसर्च इन्स्टीट्यूट, पुणे।
10. **विज्ञानेश्वरः।** (१९४९)। *मिताक्षराः याज्ञवल्क्यस्मृतेः टीका* (व्यवहाराध्यायः; नारायणराम आचार्य, संपा., ५म सं.)। निर्णयसागर मुद्रणालयः, मुम्बई।
11. **संस्कृतं टूडे (सम्पादकीय-मण्डलम्)।** (२०२१)। ऋणपाप-समुद्धाराद् ऋणोद्धारो वरः स्मृतः इति विवेचनम्। *संस्कृतं टूडे (Sanskritam Today)*, ४(२), १२–१८।
12. **सेनगुप्त, नरोत्तम चन्द्र।** (१९५३)। *इवोल्यूशन ऑफ एन्शिएण्ट इण्डियन लॉ (Evolution of Ancient Indian Law)*। ईस्टर्न लॉ हाउस, कोलकाता।